M. T. B. COLLEGE, SURAT
Manuscripts Library

No Ref. / Ser. 1564

Title: Vivaha Paddhati

incomplete

		Vivāha Paddhati (?)	Title
			Author
			Editor
			Year, Vols.
			Publisher
1564			Remarks

1564

मधुपर्कपूजां कुर्यात्। यथा कन्यापितासनं दत्वा तस्य पश्चात्तिष्ठंस्तं वरमाह साधुभ
वानस्तितमर्चयिष्यामो भवंतमिति अर्चयेति वरः। ततः विष्टरो इत्यनेन त्रिरुक्ते दाता
प्रसम्क्रस्वस्तिछन्न् प्रतिगृह्यतामिति कूर्चं पंश। चविंशतिकुशमयं दद्यात्। तं वर आ
सनस्य पश्चात्तिष्ठंतं गृहीत्वा विष्टरायेन मद्यासनं दत्वोपविशेत् ततोन्येन त्रिःपा
द्यमिसुक्ते गंधदूर्वाक्षतायुतां दाता प्रतिगृह्यतामिति निवेदिते वरस्य आदौ
सव्यं ततो दक्षिणमिति पादौ प्रक्षालयेत्। ततो दातान्यं विष्टरमन्येन त्रिर्निवेदि
तमादाय वरपादयोरधो दद्यात्। ततो गंधपुष्पाक्षतकुशतिलसर्षपदधिदूर्वायुतम
र्घमादायान्येनार्घमिति त्रिरुक्ते दाता प्रतिगृह्यतामिति दद्यात्। वरस्तमधोन मद
त्यंजलिनादाय शिरसाभिवाद्य भूमौ क्षिपेत्। ततोन्येनाचमनीयमिति त्रिरुक्ते दत्त
प्रतिगृह्य सकृत्प्राश्याचमेत्। ततोन्येन मधुपर्क इत्युक्ते दात्रा दत्तं कांस्यस्थं तेने
वविहितं दधिमधुघृतं यावरो दात्तहस्तस्थमुद्घाट्य सावित्रेनमइत्यवेक्ष्य
पि

सवित्रे नम इति प्रतिगृह्य वामे निधाय मधुपर्काय नम इति अनामिकयालोड्या
नामिकांगुष्ठाभ्यां बहिः क्षिप्त्वा पुनरेवं द्विः कृत्वा ताभ्यां मे वप्राश्नीयात्। मधुपर्का
य नम इति वा अंगुष्ठनामिकया द्वितीयमंगुष्ठमध्यमाभ्यां तृतीयमिति स्मृति कौमुदी
तच्छिष्टं ततः शेषमसंचरे निनीय द्विराचम्य पुनराचम्य वाचे नमः मुखे प्राणायनमः
स्तोः चक्षुभ्यां चक्षुषोः। श्रोत्राभ्यां कर्णयोः। बलायेति बाह्वोः। अजस्रेगवे नम ओजस उ
रूर्वोः। अंगेभ्यस्संगेषु। ततोन्येन गौरीसुक्ते प्रतिगृह्य रुद्राणां मात्रे वसूनां दुहित्रे आदि
त्यस्वसृगवे नमः। ममार्च कस्य च पाप्माहतरत्युपांशुउत्सृजेत्। तृणान्यत्तु इत्युच्चैः
विसर्जयेत्। ततो दाता वस्त्रालंकारगंधस्रगाद्यैः वरं पूजयेत्। ततः सुलग्नेंतः पटं धृत्वा
मुखं निरीक्षेत्। अन्ये तु मैत्रलग्नसमये पाणिग्रहणमिच्छंति तन्नो ततः परमपसार्य वरो वधू
मुखमीक्षेत अत्र याग्निं प्रतिष्ठाप्य पश्चाद्युग तृणपूलं कटं च निधाय कन्यापितृदत्तवस्त्रे
चतुष्टयमध्ये द्वे आयुष्मतीदं वासः परिधत्स्वेति आदृत्या दधात्। सा च वाससे नम
इत्यादत्त्वा परिदध्यात्। ततो दाता वधूमीक्षस्वेति प्रेषितो वधूमीक्षेत ततः कन्यादानमि
तिहरिहरः। अन्ये तु कन्यादानोत्तरं वस्त्राद्याद्युः। करोतु स्वस्ति ते ब्रह्मेत्याद्यैरक्षतारोपणं

ते कन्यापितोदङ्मुखः स्वदक्षिणे पत्नीमुपवेश्य कुशपाणिराचम्य देशकालौ संकीर्त्य
मम समस्तपितॄणां निरतिशयसानंदब्रह्मलोकावाप्त्यादि कन्यादानकल्पोक्तफ
लावाप्तये अनेन वरेणास्यां कन्यायामुत्पादयिष्यमाणसंतत्या ब्राह्मणे पक्षे द्वादशावरा
न् द्वादशपरान् प्राजापत्यपक्षे षडवरान् षट्परान् पुरुषान् पवित्रीकर्तुमात्मनश्च श्री
लक्ष्मीनारायणप्रीतये ब्राह्मविवाहविधिना प्राजापत्यविधिना वालंकृतकन्यादान
महं करिष्ये इत्युक्त्वा पठेत्। कन्यां कनकसंपन्नां कनकाभरणैर्युतां। दास्यामि विष्ण
वे तुभ्यं ब्रह्मलोकजिगीषया। विश्वंभरः सर्वभूताः साक्षिण्यः सर्वदेवताः। इमां कन्यां
प्रदास्यामि पितॄणां तारणाय चेति ततः कांस्यपात्रे वरहस्तोपरि वधूहस्तो स्वहस्तं न्यस्य
वरहस्ते सुप्रोक्षितमस्तु। शिवा आपः संतु। सौमनस्यमस्तु। इत्युक्त्वा कन्या तारयतु पुण्यं
वर्धतां। शांतिः पुष्टिस्तुष्टिश्चास्तु। तिथिकरणमुहूर्तनक्षत्रसंपदस्तु। पुण्याहं भवंतो
ब्रुवंतु। पुण्याहमिति विप्राः। स्वस्ति भवंतः। ऋद्धिं भवंतः। श्रीरस्त्विति भवंतः। अमुकस्य

सोहं मम समस्तपितॄणामित्यादि लक्ष्मीनारायणप्रीतयइत्यंतं प्राग्वदुक्त्वा। काश्यपगोत्रस्य
ब्रह्मदासस्य प्रपौत्राय· विष्णुदासस्य पौत्राय· शिवदासपुत्राय· काश्यपगोत्राय देवदत्तदासा
यवराय· काश्यपगोत्रां चैत्रदासस्य प्रपौत्रीं मैत्रदासस्य पौत्रीं भोजदासस्य पुत्रीममुकप्रे
ष्यांनाम्नीं च कन्यां प्रजापतिदैवत्यां यथाशक्त्यालंकृतामित्युक्त्वा पुनरेवं द्विरुच्चार्य शतज्यो
तिष्टोमातिरात्रफलप्राप्तिकामः प्रजोत्पादनार्थं सधर्मचरणार्थं प्राजापत्ये सहधर्मं चर
तं भार्यां ते न तुभ्यमहं संप्रददे इति कुशयवयुतं जलं कन्याहस्तं वरहस्ते निक्षिपेत्। मयापिद
त्तेति मातापि वदेत्। इति केचित्। गोत्रोच्चारणं नेति केचित्· वरः प्रतिगृह्णामीति स्वस्ती
त्युक्त्वा भुवं स्पृशेत्। गौरीं कन्यामिमां विप्र भो लं यथाशक्तिविभूषितां। गोत्राय चैव वदा
साय तुभ्यं दत्तां समाश्रय। कन्ये ममाग्रतो भूयाः कन्ये मे देवि पार्श्वयोः। कन्ये मे पृष्ठतो
भूयास्त्वद्दानात्स्वर्गमाप्नुयां। मम वंशकुले जाता पालिता वत्सराष्टकं। तुभ्यं दासमयाद
त्ता पुत्रपौत्रप्रवर्द्धनीति पठेत्। ततः कन्यादानप्रतिष्ठार्थमिदं सुवर्णं गोमिथुनं च दक्षि
णां संप्रददे इति दद्यात्। ततः शक्तौ सत्यां ताम्रकांस्यपात्रगवाश्वदासादि दद्यात्। कन्या ३

बांधवाश्वपोतकं दद्युः। वरताभिन्नादद्योपिदद्युरिति केचित्। होमांते केचिदाहुः। ततः
चतुर्वारं पंचवारं वा वधूवरौ सूत्रेण वेष्ट्योपरितनमधोवस्त्रं नं चोपरि निःकाश्य
त्रिगुणं पीतं च कृत्वा धस्तनं वरहस्ते उपरितनं च वधूहस्ते कंकणं बध्नीयात्। येनब
द्धो बली राजा दानवेंद्रो महाबलः। तेन त्वामभिबध्नामि रक्षे मा चल मा चलेति।
ततः वधूवराभ्यां दुग्धार्द्राक्षतारोपणं वध्वांजलौ वरेण च कार्यं· मंत्रास्तु। भगायन
मः। यज्ञायन· श्रियै न· धर्माय· प्रजायै· यशसे नमः इति ततः प्राङ्मुखावुपवेश्य वस्त्रे
कन्यायै दद्यात्। सा च वासोभ्यां नम इति परिदध्यात्। ततो वरो मांगल्यतंतुनानेन
भर्तृजीवनहेतुना। कंठे बध्नामि सुभगे सा जीव शरदां शतं। इति सौभाग्यतंतु वधू
गले बध्नीयात्। ततो विश्वेदेवाप्रमोतरश्चधात्रभ्यो नमः इति वधूमीक्षेत। अत्रवा
कोस्कं भस्सूत्रेण कंकणं ततो वेद्यां प्राङ्मुखौ तेजनी वीरणकटे पश्चादग्नेरुपविश्य द
क्षिणे ऐशान्यां वामं गृहीत्वा कुंभस्कंधे। गृहीत्वा काश्चित्तिष्ठेदासप्तमं पदमुत्तरतो हव

उपलेपे कृते निधायात्र वरः कन्यानाम वदेदित्याचारः। ततो वधूपित्रा परस्परं
४ समीक्षितव्यमित्युक्ते न्योन्यं समीक्ष्य अघोरचक्षुरपतिघ्नी शिवा च सुमनास्तथा
सुवर्चाः पुत्रसूर्देवकामा च सुभगा भवेति वरो वदेत्। सोमगंधर्वाग्निपूषभ्यो नमः
इति श्रूयमाणां गृह्यसूत्राद्ये घध्यपनाभावादुक्तहोमाग कन्यापत्नीभावास्य युक्तिश
न्याभावाद्य विवाहे होम एव नास्तीति मदपालः। अन्ये तु प्रधानेधिकारसिद्धौ स्व
पतीष्टिवदंगेपि श्रावणोपदेशादिनाज्ञानसंभवात्। होममाहुः। यथा गुरुर्दक्षिणेत्र
ह्मासनं दत्वा तमुपवेश्य मन्मये पात्रे जलपूर्णे कुशान्निधायोत्तरतः कुशेषु निधाया
ग्निं दर्भैः पूर्वादि परिस्तीर्यासादनं कुर्यात्। त्रीणि तृणानि द्वे पवित्रे प्रोक्षणी माज्यस्थाली
चरुस्थाली संमार्गकुशाः उपयमनकुशास्तिस्रः समिधः स्रुव आज्यं तंडुलाः लाजाः
शूर्पे संस्रवपात्रे अ— आनडुहं गोर्दक्षिणेति च ततः प्रादेशमात्रे छित्वा प्रोक्षणीः सं
स्कृत्य पवित्राभ्यामुत्पूयन चैते निधाय दक्षिणेन सव्ये कृत्वोदिगगनं कृत्वा पात्राणि ४

प्रोक्ष्य निधायाज्यं स्थाल्यां निरूप्याग्नौ दक्षिणे धित्यो न्मुकेन लौलाजैः सह पर्यग्निं कृ
त्वा स्रुवं प्रतप्य कुशैः संमृज्य प्रोक्षणीभिः प्रोक्ष्य पुनः प्रताप्य दक्षिणे निधायाज्यमु
द्वास्योत्पूतावेक्ष्य भक्षे निरस्य पुनः प्रोक्षणीरुत्पूयावेक्ष्योपयमनकुशानादायोत्थाया
ग्नौ तिस्रः समिधोभ्याधाय प्रोक्षणीभिः पर्युक्ष्य वरेणान्वारब्धो गुरुर्दक्षिणं जान्वाच्य
ब्रह्मणा दक्षिणहस्तेनान्वारब्धं स्रुवेण जुहुयात् प्रजापतये नमः इंद्राय नमः इत्याघा
रौ इदं प्रजापतये न ममेत्यादि वरः सर्वत्र त्यागं कुर्यात्। अग्नये नमः सोमायेत्या
ज्यभागौ अग्नये वायवे सूर्याय अग्नीवरुणाभ्यां द्वि। अग्नये वरुणसवितृवि
ष्णुविश्वेदेवमरुत्स्वर्केभ्यो नमः वरुणायादित्यायादितये प्रजापतये नमः इति
नवाहुतयः त्रिरग्नये मरुत्वते च जुहुयान्नवात ततः कन्यां तत्लाबुपस्तीर्य वध्वाः
भ्राता तत्स्थाने वान्यः शमीपालाशमिश्रलाजान् शूर्पादंजलिनाद्धिः क्षिपति त
तो भिघार्येति छंती अग्नये नमः इति त्रिर्जुहुयात्। मंत्रो वरस्यैव वरो वध्वाद

क्षिणं हस्तं सांगुष्ठमुत्तानमुत्तानेन हस्तेन गृह्णीत। तत्र मंत्रः। भगार्यमसवितृभ्यो
नमः। वित्तसोमप्रगुणोर्युक्ता वीरसूर्जीवसूः सर्वदा। कुले मदीये संराज्ञी मन्त्रितानुग
तास्त्विति ततो गृहीतामेव वधूमुत्तरतोऽग्नेर्दक्षिणेन पदाश्मानमारोहयति क
न्यायै नम इति ततः गाथा गायति ततोऽग्नये नम इत्यग्निं परिक्रम्य पुनर्द्विजो लौ
दिपरिक्रमां ते कृत्वा चतुर्थे शूर्पपुटेन वधूभ्राता सर्व लाजान् कन्यांजला
वावपति तान् भगाय नम इति तिष्ठंती जुहोति। ततोऽग्निं चतुर्थपरिक्रम्योपवि
श्य तत्र प्राचार प्रजापतये नम इति कृत्वोत्तरतः उदकसंस्थान् सप्ततंडुलपुंजान् बे
कृत्वा वधूं विष्णवे नम इति दक्षिणेन पदा वरः सप्तपदानि क्रमयति इषे नमः विष्णु
वे नमः सर्वत्र ऊर्जे रायस्पोषाय मायोभव्याय पंचजाभ्यो ऋतुभ्यो सखिभ्यो नम सप्त
नौरिति केचित्। ततः सप्तमे पदे पुरुष्यो शिरसी संनिधाय र्वकुंभोदकेन वरं
आम्र पल्लवैनैरभिषिंचेत्। वरेण सूर्यमुदीक्ष स्वेति उक्त्वा। सूर्याय नम इति स ५